रामेश्वरं स्तोत्र संग्रह

सुताम्रपर्णी जलराशियोगे, निबध्य सेतुं विशिखैरसंख्यैः।
श्रीरामचन्द्रेण समर्पितं तं, रामेश्वराख्यं नियतं नमामि।।

Essence Of Astrology

- By Lokesh Agrawal

http://essenceofastro.blogspot.com/

https://www.facebook.com/essenceofastro

।। श्रीरामलिङ्गाष्टकम् ।।

यह स्तोत्र हमने स्तोत्रार्णव: नामक संस्कृत ग्रंथ से लिया है जिसका संपादन टी. चन्द्रशेखर और प्रकाशन चेन्नई सरकार ने वर्ष १९६१ में किया था।

वेदवृन्दवन्दितं वरेण्यरूपसुन्दरं
धेनुदुग्धदोहफेनसन्निभं सदाशिवम् ।
ध्यानध्येयमप्रमेयमग्रणेयमीश्वरं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥१॥

पञ्चवक्त्रमीदृशं भुजङ्गमेशवन्दितं
भानुतारकेश्वरानलत्रिनेत्रधारिणम् ।
नागराजभूषणं विभूतिदेहधूसरं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥२॥

पार्वतीपयोधरप्रभाविहारलालसं
क्रीडनाय शैलजार्धदेहभागभोगिनम् ।
उर्वशीमुखाभिरेव ताण्डवानुरञ्जितं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥३॥

Essence Of Astrology

घण्टिकात्रिशूलपाशयन्त्रराजधारिणं
श्रीवसन्तभैरवादिसर्वरागरागिणम् ।
बिल्वरुच्य पद्ममल्लिकादिपुष्पपूजितं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥४॥

नेत्रजातवेदसा प्रसूनपञ्चबाणहं
दक्षयज्ञवेदगर्भ मन्त्रतानुरञ्जितम् ।
श्रीहरं पुरापहं सुरावलीसुखप्रदं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥५॥

धूर्जटिं त्रिलोचनं मृडाह्वयं सदाशिवं
सुन्दरं वृषाधिरूढमम्बयानुरञ्जितम् ।
शङ्करं कपर्दिनं महेश्वरं हरं शिवं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥६॥

ज्योतीरूपमिन्दुमौलिमङ्गलप्रदं हरं
विश्वसृष्टिरक्षमीषणं महेश्वरं ।

लिङ्गरूपमद्वयं जाह्नवीजटाधरं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥७॥

तथैव विश्वनाथमेव काशिकापुरे स्थितं
श्रीगिरौ च मल्लिकार्जुनेश्वरं सुरेश्वरम् ।
तथैव नर्मदातटे त्रिशूलपाणिनं शिवं
(श्री) रामलिङ्गमाद्यमीशमीश्वरं स्मराम्यहम् ॥८॥

रामलिङ्गाष्टकं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥९॥

॥ इति श्रीरामलिङ्गाष्टकं सम्पूर्णम् ॥

Essence Of Astrology

।। श्रीरामनाथस्तुति ।।

यह स्तोत्र हमने भक्तिसुधातरङ्गिणी नामक संस्कृत स्तोत्रसंग्रह से लिया है जिसके रचनाकार शृंगेरी शारदा पीठम के ३३वें आचार्य जगद्गुरु शंकराचार्य श्री सच्चिदानंद शिवाभिनव नरसिंह भारती महास्वामीजी हैं।

श्रीरामपूजितपदाम्बुज चापपाणे
श्रीचक्रराजकृतवास कृपाम्बुराशे
श्रीसेतुमूलचरणप्रवणान्तरङ्ग
श्रीरामनाथ लघु तारय जन्मवार्धिम् ॥१॥

नम्राघवृन्दविनिवारणबद्धदीक्ष
शैलाधिराजतनयापरिरब्धवर्ष्मन् ।
श्रीनाथमुख्यसुरवर्यनिषेविताङ्घ्रे
श्रीरामनाथ लघु तारय जन्मवार्धिम् ॥२॥

शूराहितेभवदनाश्रितपार्श्वभाग
क्रूरारिवर्गविजयप्रद शीघ्रमेव ।
साराखिलागमतदन्तपुराणपङ्क्तेः
श्रीरामनाथ लघु तारय जन्मवार्धिम् ॥३॥

शब्दादिमेषु विषयेषु समीपगेष्व-
प्यासक्तिगन्धरहितान्निजपादनम्रान् ।
कुर्वाण कामदहनाक्षिलसल्ललाट
श्रीरामनाथ लघु तारय जन्मवार्धिम् ॥४॥

॥ इति श्रीरामनाथस्तुतिः सम्पूर्णा ॥

Essence Of Astrology

।। रामनाथस्तोत्र ।।

यह स्तोत्र हमने स्कन्दपुराण, खण्ड ३ (ब्रह्मखण्ड) के अंतर्गत सेतुखण्ड, अध्याय ४८ से संकलित किया है, जहाँ पांड्यदेश के शंकर नामक राजा और शाकल्य मुनि की कथा आती है। इस कथा के अनुसार, राजा शंकर ने अनजाने में हुई ब्राह्मणहत्या तथा स्त्रीहत्या के प्रायश्चित हेतु रामेश्वर लिंग का एक वर्ष तक विधिवत पूजन-अर्चन कर, भक्तिपूर्वक रामेश्वर की स्तुति की। इसके फलस्वरूप, उन्हें ब्रह्महत्या से मुक्ति प्राप्त हुई। भगवान शिव के आशीर्वाद स्वरूप, जो भी इस स्तोत्र का पाठ करता है, उसे रामेश्वर सेवा का पूर्ण फल प्राप्त होता है तथा उसके सभी पाप नष्ट हो जाते हैं।

शंकर उवाच

नमामि रुद्रमीशानं रामनाथमुमापतिम् ॥१॥
पाहि मां कृपया देव ब्रह्महत्यां दहाशु मे ।
त्रिपुरघ्न महादेव कालकूटविषादन ॥२॥
रक्ष मां त्वं दयासिंधो स्त्रीहत्यां मे विमोचय ।
गंगाधर विरूपाक्ष रामनाथ त्रिलोचन ॥३॥
मां पालय कृपादृष्ट्या छिन्धि मत्पातकं विभो ।
कामारे कामसंदायिन्भक्तानां राघवेश्वर ॥४॥
कटाक्षं पातय मयि शुद्धं मां कुरु धूर्जटे ।
मार्कंडेयभयत्राण मृत्युंजय शिवाव्यय ॥५॥
नमस्ते गिरिजार्धाय निष्पापं कुरु मां सदा ।
रुद्राक्षमालाभरण चन्द्रशेखर शंकर ॥६॥

वेदोक्तसम्यगाचारयोग्यं मां कुरु ते नमः ।
सूर्यदंतभिदे तुभ्यं भारतीनासिकाच्छिदे ॥७॥
रामेश्वराय देवाय नमो मे शुद्धिदो भव ।
आनंदं सच्चिदानंदं रामनाथं वृषध्वजम् ॥८॥
भूयोभूयो नमस्यामि पातकं मे विनश्यतु ।
भक्त्यैवं स्तुवतस्तस्य रामनाथं महेश्वरम् ॥९॥
निर्जगाम मुखाद्राज्ञो ब्रह्महत्यातिभीषणा ।
नीलवस्त्रधरा क्रूरा महारक्तशिरोरुहा ॥१०॥
तां ब्रह्महत्यां बीभत्सां नृपवक्त्राद्विनिर्गताम् ।
निजघान त्रिशूलेन भैरवो रुद्रशासनात् ॥११॥
हतायां ब्रह्महत्यायां भैरवेण शिवाज्ञया ।
रामनाथो नृपं प्राह स्तुत्या तस्य प्रसन्नधीः ॥१२॥
॥ इति रामनाथस्तोत्र सम्पूर्णा ॥

Essence Of Astrology

।। रामेश्वर स्तोत्रम् ।।

यह स्तोत्र हमने शिवरहस्य पंचम अंश अध्याय २८ में स्थित शिव-गौरी संवाद में रामेश्वर महिमा वर्णन से लिया है।

रामः -

रामेश्वरेश्वर महेश पिनाकपाणे
गम्भीरसागरनिषङ्ग भुजङ्गहार ।
द्रापिन् हिरण्मयशरीर सुचन्द्रमौले
गङ्गोत्तमाङ्ग भव भूतपते नमस्ते ॥१॥
विश्वोदयस्थितिलयान्तकर प्रसीद
मामाशु पाहि ददया प्रमथाधिनाथ ।
दुर्वारदुःखतरसंसृतिबन्धनाशं
शश्वत् कुरुष्व भगवन् करुणाकटाक्षैः ॥२॥
पाहि प्रसीद परमेश्वर पञ्चवक्त्र
भर्ग त्रियंबक सुरासुरपूज्यपाद ।
पौलस्त्यसंहृतिभवाघभरं हरस्व
मद्दुःखजालमपराधगणं क्षमस्व ॥३॥
॥ इति रामेश्वर स्तोत्रम् सम्पूर्णम् ॥

।। रामादिभी रामनाथस्तोत्र ।।

हमने यह स्तोत्र स्कन्दपुराण खण्ड ३ ब्रह्मखण्डः के सेतुखण्ड अध्याय ४९ से संकलित किया है। रामेश्वरम ज्योतिर्लिङ्ग की स्थापना के उपरान्त रामचन्द्र ही ने, लक्ष्मण ने, सीता ने, सुग्रीव आदि वानरों ने, अगस्त्य आदि ऋषियों ने, ब्रह्मा आदि ऋषियीं ने रामेश्वर की स्तुति की थी जिसके श्रवण मात्र से मनुष्य मुक्त हो जाते हैं। इस स्तुति के पढ़ने, सुननें और सुनाने मात्र से मनुष्य रामेश्वरं ज्योतिर्लिङ्ग के पूजन, धनुष्कोटि तीर्थ स्नान, रामसेतु वास, गन्धमादन के समस्त तीर्थ स्नान का फल प्राप्त करता है। इसके पाठ से मनुष्य जन्म, मरण, ज़रा, रोग आदि के भय से छूटकर भगवान् शिव के सामुज्य को प्राप्त होता है।

श्रीराम उवाच

नमो महात्मने तुभ्यं महामायाय शूलिने ।
स्वपदांबुजभक्तार्तिहारिणे सर्प हारिणे ॥१॥
नमो देवाधिदेवाय रामनाथाय साक्षिणे ।
नमो वेदांतवेद्याय योगिनां तत्त्वदायिने ॥२॥
सर्वदानंदपूर्णाय विश्वनाथाय शंभवे ।
नमो भक्तभयच्छेदहेतुपादाब्जरेणवे ॥३॥
नमस्तेऽखिलनाथाय नमः साक्षात्परात्मने ।
नमस्तेऽद्भुतवीर्याय महापातकनाशिने ॥४॥
कालकालाय कालाय कालातीताय ते नमः ।
नमोऽविद्यानिहंत्रे ते नमः पापहराय च ॥५॥
नमः संसारतप्तानां तापनाशैकहेतवे ।

नमो मद्ब्रह्महत्याविनाशिने च विषाशिने ॥६॥
नमस्ते पार्वतीनाथ कैलासनिलयाव्यय ।
गंगाधर विरूपाक्ष मां रक्ष सकलापदः ॥७॥
तुभ्यं पिनाकहस्ताय नमो मदनहारिणे ।
भूयोभूयो नमस्तुभ्यं सर्वावस्थासु सर्वदा ॥८॥

लक्ष्मण उवाच
नमस्ते रामनाथाय त्रिपुरघ्नाय शंभवे ।
पार्वतीजीवितेशाय गणेशस्कन्दसूनवे ॥९॥
नमस्ते सूर्यचद्राग्निलोचनाय कपर्दिने ।
नमः शिवाय सोमाय मार्कंडेय भयच्छिदे ॥१०॥
नमः सर्वप्रपंचस्य सृष्टिस्थित्यंतहेतवे ।
नम उग्राय भीमाय महादेवाय साक्षिणे ॥११॥
सर्वज्ञाय वरेण्याय वरदाय वराय ते ।
श्रीकण्ठाय नमस्तुभ्यं पंचपातकभेदिने ॥१२॥
नमस्तेऽस्तु परानंदसत्यविज्ञानरूपिणे ।
नमस्ते भवरोगघ्न स्नायूनां पतये नमः ॥१३॥
पतये तस्कराणां ते वनानां पतये नमः ।

गणानां पतये तुभ्यं विश्वरूपायसाक्षिणे ॥१४॥
कर्मणा प्रेरितः शम्भो जनिष्ये यत्रयत्र तु ।
तत्रतत्र पदद्वंद्वे भवतो भक्तिरस्तु मे ॥१५॥
असन्मार्गे रतिर्मा भूद्भवतः कृपया मम ।
वैदिकाचारमार्गे च रतिः स्याद्भवते नमः ॥१६॥

सीतोवाच
परमकारण शंकर धूर्जटे
गिरिसुतास्तनकुंकुमशोभित ।
मम पतौ परिदेहि मतिं सदा
न विषमां परपूरुषगोचराम् ॥१७॥
गंगाधर विरूपाक्ष नीललोहित शंकर ।
रामनाथ नमस्तुभ्यं रक्ष मा करुणाकर ॥१८॥
नमस्ते देवदेवेश नमस्ते करुणालय ।
नमस्ते भवभीतानां भवभीतिविमर्दन ॥१९॥
नाथ त्वदीयचरणांबुजचिंतनेन
निर्द्धूय भास्करसुताद्वयमाशु शम्भो ।
नित्यत्वमाशु गतवान्स मृकंडुपुत्रः किं

वा न सिध्यति तवाश्रयणात्परेश ॥२०॥
परेशपरमानंद शरणागतपालक ।
पातिव्रत्यं मम सदा देहि तुभ्यं नमोनमः ॥२१॥

हनूमानुवाच
देवदेव जगन्नाथ रामनाथ कृपानिधे ।
त्वत्पादांभोरुहगता निश्चला भक्तिरस्तु मे ॥२२॥
यं विना न जगत्सत्ता तद्भानमपि नो भवेत् ।
नमः सद्भानरूपाय रामनाथाय शंभवे ॥२३॥

अंगद उवाच
यस्य भासा जगद्भानं यत्प्रकाशं विना जगत् ।
न भासते नमस्तस्मै रामनाथाय शंभवे ॥२४॥

जांबुवानुवाच
सर्वानंदो यदानंदो भासते परमार्थतः ।
नमो रामेश्वरायास्मै परमानंदरूपिणे ॥२५॥

Essence Of Astrology

नील उवाच

यद्देशकालदिग्भेदैरभिन्नं सर्वदा द्वयम्

तस्मै रामेश्वरायास्मै नमोऽभिन्नस्व रूपिणे ॥२६॥

नल उवाच

ब्रह्मविष्णुमहेशाना यदविद्याविजृंभिताः ।

नमोऽविद्याविहीनाय तस्मै रामेश्वराय ते ॥२७॥

कुमुद उवाच

यस्त्वरूपापरिज्ञानात्प्रधानं कारणत्वतः ।

कल्पितं कारणायास्मै रामनाथाय शंभवे ॥२८॥

पनस उवाच

जाग्रत्स्वप्नसुषुप्त्यादियदविद्याविजृंभितम् ।

जाग्रदादिविहीनाय नमोऽस्मै ज्ञानरूपिणे ॥२९॥

गज उवाच

यत्स्वरूपापरिज्ञानात्कार्याणां परमा णवः ।

कल्पिताः कारणत्वेन तार्किकापसदैर्वृथा ॥३०॥
तमहं परमानंदं रामनाथं महेश्वरम् ।
आत्मरूपतया नित्यमुपासे सर्वसाक्षिणम् ॥३१॥

गवाक्ष उवाच
अज्ञानपाशबद्धानां पशूनां पाशमोचकम् ।
रामेश्वरं शिवं शांतमुपैमि शरणं सदा ॥३२॥

गवय उवाच
साध्वस्तजगदाधारं चंद्रचूडमुमापतिम् ।
रामनाथं शिवं वन्दे संसारामयभेषजम् ॥३३॥

शरभ उवाच
अंतःकरणमात्मेति यदज्ञानाद्विमोहितैः ।
भण्यते रामनाथं तमात्मानं प्रणमाम्यहम् ॥३४॥

गन्धमादन उवाच
रामनाथमुमानाथं गणनाथं च त्र्यंबकम् ।

सर्वपातकशुद्ध्यर्थमुपासे जगदीश्वरम् ॥३५॥

सुग्रीव उवाच

संसारांभोधि मध्ये मां जन्ममृत्युजले भये ।
पुत्रदारधनक्षेत्रवीचिमालासमाकुले ॥३६॥
मज्जद्ब्रह्मांडखंडे च पतितं नाप्तपारकम्
क्रोशंतमवशं दीनं विषयव्या लकातरम् ॥३७॥
व्याधिनक्रसमुद्विग्नं तापत्रयझषार्तिदम्
मां रक्ष गिरिजानाथ रामनाथ नमोऽस्तु ते ॥३८॥

विभीषण उवाच

संसारवनमध्ये मां विनष्टनिजमार्गके ।
व्याधिचौरे क्रोधसिंहे जन्मव्याघ्रे लयोरगे ॥३९॥
बाल्ययौवनवार्धक्यमहाभीमांधकूपकेव् ।
क्रोधेर्ष्या लोभवह्नौ च विषयक्रूरपर्वते ॥४०॥
त्रासभूकंटकाढ्ये च सीदंतमधुनांधकम् ।
शोभनां पदवीं शंभो नय रामेश्वराधुना ॥४१॥

सर्वे वानरा ऊचुः

निंद्यानिंद्येषु सर्वत्र जनित्वा योनिषु प्रभो ।
कुंभीपाकादिनरके पतित्वा च पुनस्तथा ॥४२॥
जनित्वा च पुनर्योनौ कर्मशेषेण कुत्सिते ।
संसारे पतितानस्मात्रामनाथ दयानिधे ॥४३॥
अनाथान्विवशान्दीनान्क्रोशतः पाहि शंकर ।
नमस्तेस्तु दयासिंधो रामनाथ महेश्वर ॥४४॥

ब्रह्मोवाच

नमस्ते लोकनाथाय रामनाथाय शंभवे ।
प्रसीद मम सर्वेश मदविद्यां विनाशय ॥४५॥

इंद्र उवाच

यस्य शक्तिरुमा देवी जगन्माता त्रयीमयी ।
तमहं शंकरं वंदे रामनाथमुमापतिम् ॥४६॥

यम उवाच

पुत्रौ गणेश्वरस्कंदौ वृषो यस्य च वाहनम् ।

Essence Of Astrology

तं वै रामेश्वरं सेवे सर्वाज्ञाननिवृत्तये ॥४७॥

वरुण उवाच

यस्य पूजाप्रभावेन जित मृत्युर्मृकंडुजः।
मृत्युंजयमुपासेऽहं रामनाथं हृदा तु तम् ॥४८॥

कुबेर उवाच

ईश्वराय लसत्कर्णकुंडलाभरणाय ते ।
लाक्षारुणशरीराय नमो रामेश्वराय वै ॥४९॥

आदित्य उवाच

नमस्तेऽस्तु महादेव रामनाथ त्रियंबक ।
दक्षाध्वरविनाशाय नमस्ते पाहि मां शिव ॥५०॥

सोम उवाच

नमस्ते भस्मदिग्धाय शूलिने सर्पमालिने ।
रामनाथ दयांभोधे स्मशाननिलयाय ते ॥५१॥

अग्निरुवाच

इन्द्राद्यखिलदिक्पालसंसेवितपदांबुज ।
रामनाथाय शुद्धाय नमो दिग्वाससे सदा ॥५२॥

वायुरुवाच

हराय हरिरूपाय व्याघ्रचर्मांबराय च ।
रामनाथ नमस्तुभ्यं ममाभीष्टप्रदो भव ॥५३॥

बृहस्पतिरुवाच

अहंतासाक्षिणे नित्यं प्रत्यगद्वयवस्तुने ।
रामनाथ ममाज्ञानमाशु नाशय ते नमः ॥५४॥

शुक्र उवाच

वंचकानामलभ्याय महामंत्रार्थरूपिणे ।
नमो द्वैतविहीनाय रामनाथाय शंभवे ॥५५॥

अश्विनावूचतुः

आत्मरूपतया नित्यं योगिनां भासते हृदि ।

Essence Of Astrology

अनन्य भानवेद्याय नमस्ते राघवेश्वर ॥५६॥

अगस्त्य उवाच
आदिदेव महादेव विश्वेश्वर शिवाव्यय ।
रामनाथांबिकानाथ प्रसीद वृष भध्वज ॥५७॥
अपराधसहस्रं मे क्षमस्व विधुशेखर ।
ममाहमिति पुत्रादावहंतां मम मोचय ॥५८॥

सुतीक्ष्ण उवाच
क्षेत्राणि रत्नानि धनानि दारा
मित्राणि वस्त्राणि गवाश्वपुत्राः ।
नैवोपकाराय हि रामनाथ मह्यं
प्रयच्छ त्वमतो विरक्तिम् ॥५९॥

विश्वामित्र उवाच
श्रुतानि शास्त्राण्यपि निष्फलानि
त्रय्यप्यधीता विफलैव नूनम् ।
त्वयीश्वरे चेन्न भवेद्धि भक्तिः

श्रीरामनाथे शिव मानुषस्य ॥ ६०॥

गालव उवाच
दानानि यज्ञा नियमास्तपांसि
गंगादितीर्थेषु निमज्जनानि ।
रामेश्वरं त्वां न नमंति ये तु
व्यर्थानि तेषामिति निश्चयोऽत्र ॥ ६१॥

वसिष्ठ उवाच
कृत्वापि पापान्यखिलानि
लोकस्त्वामेत्य रामेश्वर भक्तियुक्तः ।
नमेत चेत्तानि लयं व्रजेयुर्यथांधकारो रवितेजसाऽद्धा ॥ ६२॥

अत्रिरुवाच
दृष्ट्वा तु रामेश्वरमेकदापि
स्पृष्ट्वा नमस्कृत्य भवंतमीशम् ।
पुनर्न गर्भं स नरः प्रयायात्किं
त्वद्वयं ते लभतं स्वरूपम् ॥ ६३॥

अंगिरा उवाच
यो रामनाथं मनुजो
भवंतमुपेत्य बंधून्प्रणमन्स्मरेत ।
संतारयेत्तानपि सर्वपापात्किम-
द्भुतं तस्य कृतार्थतायाम्।। ६४।।

गौतम उवाच
श्रीरामनाथेश्वर गूढमेत्तद्र-
हस्यभूतं परमं विशोकम् ।
त्वत्पादमूलं भजतां नृणां ये
सेवां प्रकुर्वंति हि तेऽपि धन्याः ।। ६५।।

शतानंद उवाच
वेदांतविज्ञानरहस्यविद्भिर्वि-
ज्ञेयमेतद्धि मुमुक्षुभिस्तु ।
शास्त्राणि सर्वाणि विहाय
देव त्वत्सेवनं यद्रघुवीरनाथ ।। ६६।।

Essence of Astrology

भृगुरुवाच
रामनाथ तव पादपंकजं
द्वंद्वचिंतनविधूतकल्मषः ।
निर्भयं व्रजति सत्सुखाद्वयं
सुप्रभं त्वथ अमोघचिद्धनम् ॥ ६७॥

कुत्स उवाच
रामनाथ तव पादसेवनं
भोगमोक्षवरदं नृणां सदा ।
रौरवादिनरकप्रणाशनं कः
पुमान्न भजते रसग्रहः ॥ ६८॥

काश्यप उवाच
रामनाथ तव पादसेविनां
किं व्रतैरुत तपोभिरध्वरैः ।
वेदशास्त्र जपचिन्तया च किं
स्वर्गसिन्धुपयसापि किं फलम् ॥ ६९॥
श्रीरामनाथ त्वमागत्य शीघ्रं

Essence Of Astrology

ममोत्क्रांतिकाले भवान्या च साकम् ।
मां प्रापय स्वात्मपादारविन्दं
विशोकं विमोहं सुखं चित्स्वरूपम् ॥ ७० ॥

गन्धर्वा ऊचुः
रामनाथ त्वमस्माकं भजतां भवसागरे ।
अपारे दुःखकल्लोले न त्वत्तोन्या गतिर्हि नः ॥ ७१ ॥

किन्नरा ऊचुः
रामनाथ भवारण्ये व्याधिव्याघ्रभयानके ।
त्वामंतरेण नास्माकं पदवीदर्शको भवेत् ॥ ७२ ॥

यक्षा ऊचुः
रामनाथेंद्रियारातिबाधा नो दुःसहा सदा ।
तान्विजेतुं सहायस्त्वमस्माकं भव धूर्जटे ॥ ७३ ॥

नागा ऊचुः
अचिन्त्यमहिमानं त्वा रामनाथ वयं कथम्।

स्तोतुमल्पधियः शक्ता भविष्यामोंऽबिकापते ॥७४॥

किंपुरुषा ऊचुः

नानायोनौ च जननं मरणं चाप्यनेकशः ।
विनाशय तथाऽज्ञानं रामनाथ नमोऽस्तु ते ॥७५॥

विद्याधरा ऊचुः

अंबिकापतये तुभ्यमसंगाय महात्मने।
नमस्ते रामनाथाय प्रसीद वृषभध्वज ॥७६॥

वसव ऊचुः

रामनाथगणेशाय गणवृंदार्चितांघ्रये ।
गंगाधराय गुह्याय नमस्ते पाहि नः सदा ॥७७॥

विश्वेदेवा ऊचुः

ज्ञप्तिमात्रैकनिष्ठानां मुक्तिदाय सुयोगिनाम् ।
रामनाथाय सांबाय नमोऽस्मात्रक्ष शंकर ॥७८॥

Essence Of Astrology

मरुत ऊचुः

परतत्त्वाय तत्त्वानां तत्त्वभूताय वस्तुतः ।
नमस्ते रामनाथाय स्वयंभानाय शंभवे ॥७९॥

साध्या ऊचुः

स्वातिरिक्तविहीनाय जगत्सत्ताप्रदायिने ।
रामेश्वराय देवाय नमोऽविद्या विभेदिने ॥८०॥

सर्वे देवा ऊचुः

सच्चिदानंदसंपूर्णं द्वैतवस्तुविवर्जितम् ।
ब्रह्मात्मानं स्वयंभानमादिमध्यांतवर्जितम् ॥८१॥
अविक्रियमसंगं च परिशुद्धं सनातनम् ।
आकाशादिप्रपंचानां साक्षिभूतं परामृतम्॥८२॥
प्रमातीतं प्रमाणानामपि बोधप्रदायिनम् ।
आविर्भावतिरोभाव संकोचरहितं सदा ॥८३॥
स्वस्मिन्नध्यस्तरूपस्य प्रपंचस्यास्य साक्षिणम् ।
निर्लेपं परमानंदं निरस्तसकलक्रियम्॥८४॥
भूमानंदं महात्मानं चिद्रूपं भोगवर्जितम् ।

रामनाथं वयं सर्वे स्वपातकविशुद्धये ॥८५॥
चिन्तयामः सदा चित्ते स्वात्मानंदबुभुत्सवः ।
रक्षास्मान्करुणासिन्धो राम नाथ नमोऽस्तु ते ॥८६॥
रामनाथाय रुद्राय नमः संसारहारिणे ।
ब्रह्मविष्ण्वादिरूपेण विभिन्नाय स्वमायया ॥८७॥

विभीषणसचिवा ऊचुः
वरदाय वरेण्याय त्रिनेत्राय त्रिशूलिने ।
योगिध्येयाय नित्याय रामनाथाय ते नमः ॥८८॥

Essence Of Astrology

।। शिवस्तुतिः ।।

इस प्रसिद्ध शिव स्तुति की रचना द्वैत दर्शन के महान प्रवर्तक माधवाचार्य के शिष्य श्रीनारायण पंडिताचार्य ने उस समय की जब वो रामेश्वरम मंदिर की यात्रा पर गए थे और मंदिर के द्वार बंद थे। उन्होंने इस स्तुति का उच्चारण किया, और कहा जाता है कि इसके प्रभाव से द्वार अपने आप खुल गए और भगवान शिव का दर्शन प्राप्त हुआ।

स्फुटं स्फटिक-सप्रभं स्फुटित-हाटक-श्री-जटं
शशांक-दल-शेखरं कपिल-फुल्ल-नेत्र-त्रयम् ।
तरक्षु-वर-कृत्तिमद् भुजग-भूषणं भूतिमत्
कदा नु शिति-कंठ ते वपुरवेक्षते वीक्षणम् ।। १ ।।

त्रि-लोचन विलोचने लसति ते ललामायिते
स्मरो नियम-घस्मरो नियमिनामभूद् भस्मसात् ।
स्व-भक्ति-लतया वशीकृतवती सतीयं सती
स्व-भक्त-वशगो भवानपि वशी प्रसीद प्रभो ।। २ ।।

महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवान्
अघोर रिपु-घोर तेऽनवम वाम-देवांजलिः ।
नमः सपदि-जात ते त्वमिति पंच-रूपोऽ०चितः
प्रपंचय च पंच-वृन्मम मनस्तमस्ताडय ।। ३ ।।

रसा-घनरसानलानिल-वियद्-विवस्वद्-विधु-
प्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम् ।
प्रशांतमुत भीषणं भुवन-मोहनं चेत्यहो
वपूंषि गुण-पुंषि तेऽहमहमात्मनोऽहं-भिदे ॥ ४ ॥

विमुक्ति-परमाध्वनां तव षडध्वनामास्पदं
पदं निगम-वेदिनो जगति वामदेवादयः ।
कथंचिदुप-शिक्षिता भगवतैव संविद्रते
वयं तु विरळांतराः कथमुमेश तन्मन्महे ॥ ५ ॥

कठोरित-कुठारया ललित-शूलया बाहया
रणड्डमरया स्फुरद्धरिणया स-खट्वांगया ।
चलभिरचलाभिरप्यगणिताभिरुन्नृत्यतः
चतुर्दश जगंति ते जय-जयेत्ययुर्विस्मयम् ॥ ६ ॥

पुरु-त्रिपुर-रंधनं विविध-दैत्य-विध्वंसनं
पराक्रम-परंपरा अपि परा न ते विस्मयः ।

अमर्ष-बल-हर्षित-क्षुभित-वृत्त-नेत्रोज्ज्वल-
ज्वलज्ज्वलन-हेलया शलभितं हि लोक-त्रयम् ॥ ७ ॥

सहस्र-नयनो गुहः सह-सहस्र-रश्मिर्विधुः
बृहस्पतिरुतात्पतिः स-सुर-सिद्ध-विद्याधराः ।
भवत्-पद-परायणाः श्रियमिमामगुः प्रार्थिनां
भवान् सुर-तरुर्दृशं दिश शिवां शिवा-वल्लभ ॥ ८ ॥

तव प्रिय-तमादति-प्रिय-तमं सदैवांतरं
पयस्युपहितं घृतं स्वयमिव श्रियो वल्लभम् ।
विभिद्य लघु-बुद्धयः स्व-पर-पक्ष-लक्षायितं
पठंति हि लुठंति ते शठ-हृदः शुचा शुंठिताः ॥ ९ ॥

विलास-निलयश्चिता तव शिरस्ततिर्मालिका
कपालमपि ते करे त्वमशिवोऽस्यनंतर्धियाम् ।
तथाऽपि भवतः पदं शिव-शिवेत्यदो जल्पतां
अकिंचन न किंचन व्रजिनमस्त्यभस्मीभवत् ॥ १० ॥

त्वमेव किल काम-धक् सकल-काममा-पूरयन्
अपि त्रि-नयनः सदा वहसि चात्रि-नेत्रोद्भवम् ।
विषं विष-धरान् दधत् पिबसि तेन चाऽनंदवान्
विरुद्ध-चरितोचिता जगदधीश ते भिक्षुता ॥ ११ ॥

नमः शिव-शिवाशिवाशिव शिवार्ध कृंताशिवं
नमो हर हराऽहरा-हरहरांतरीं मे दृशम् ।
नमो भव भवाभव प्रभव भूतये संपदां
नमो मृढ नमो-नमो नम उमेश तुभ्यं नमः ॥ १२ ॥

सतां श्रवण-पद्धतिं सरतु सन्नतोक्तेत्यसौ
शिवस्य करुणांकुरात् प्रति-कृतात् सदा सोदिता ।
इति प्रथित-मानसो व्यधित नाम नारायणः
शिव-स्तुतिमिमां शिवां लिकुच-सूरि-सूनुः सुधीः ॥ १३ ॥

॥ इति शिवस्तुतिः समाप्ता ॥